श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

# ॥ पिळ्ळैयन्दादि ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पिळ्ळैयन्दादि ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

श्रीतूप्पुल्प्रियनन्दनाङ्घ्रियुगलस्यान्तादिका गाधिकाः
लोकोज्जीवनहेतुतः श्रुतिनिगूढार्थान्विता द्राविडीः।
भक्त्या यो विरचय्य कर्णमधुरं तत्सन्निधौ सञ्जगौ
मित्रं तस्य गुणाकृतेश्च वरदाचार्यस्य पादौ हि नः॥

राजीवान्तर्निवासानिशवसतिसमुल्लासिवक्षःस्थलश्री -
कान्ताङ्घ्र्यब्जोत्तमाङ्गानवधिककरुणश्रीशठार्याङ्घ्रियुग्मे।
श्रीमद्रामानुजस्याभिलषितवसतेरद्भुतौदार्यशंसि -
श्रीमत्तूप्पुळ् सुतस्याऽनघचरणयुगं राजते मस्तके मे॥ 1 ॥

यद्वन्मूर्धानमेन्नो गुरुचरणयुगं मानवा नेत्रयुग्मम्
आनन्दाश्रुप्रवर्षं सततमनुभवेत् तीव्रदुःखं प्रणश्येत्।
व्योम्न्यानन्दः परे स्यात् परम उरुयशस्तूप्पुलग्रेसरस्य
तद्वन्नित्यं पदाब्जं शिरसि सुनिहितं सः कदा वा भवेन्नु॥ 2 ॥

जीवोज्जीवप्रवृत्तश्रुतिनिवहविदः शास्त्रसन्दोहवेत्तुः
सम्यक्तत्त्वार्थबोद्धुः शरणवरणसन्दर्शिनो योगिनेतुः।
श्रीमद्रामानुजस्य स्तुतिमनवरतं कुर्वतस्तूप्पुलिन्दोः
गानाच्छ्रेयः प्रदानात् परमिह परतो नास्ति नोज्जीवनार्थम्॥ 3 ॥

वेद्यां कस्योत्तरायामुदितमुरुदयं ध्यायतः श्रीधरं तम्
सत्यैकालम्बिशीलोत्तरमुनितिलकस्यार्यरामानुजस्य।
कारुण्यं ह्यात्मजीवातुरिति दृढधिया ब्रह्मतेजस्वितूप्पुल् -
नन्देनोक्तात् कलौघात् परमिह न भवेत् अस्मदुत्तारमन्त्रम्॥ 4॥

सृष्ट्यादौ लोकमीशस्तदनुकरुणया सत्त्वपूर्णं कलौघम्
व्यातन्वन् सर्वजीवातिशयकुशललाभाय सत्कीर्तिमूर्तिम्।
प्राप्याऽथो वेङ्कटाद्रिं निरवधिकयशोरूपमादाय भूयः
तूप्पुल् श्रीवेङ्कटेशाह्वयमवनितरेऽनादिपापान्यलुम्पत्॥ 5॥

नानाशास्त्रप्रवीणो निखिलनिगमवागर्थविद्वेदमौलेः
आचार्योऽस्मत्तपस्याफलत उदितवान् तूप्पुलग्रस्थलेऽग्र्यः।
सूरीन्द्रो वेङ्कटेशो बहुविधसुकलालोलजिह्वाप्रघोष -
प्रध्वस्तारातिचक्रस्त्विति हि समनवं नैक्ष एनो ममोग्रम्॥ 6॥

अद्याऽऽरभ्याऽघसङ्घाः ! मदितरपदमन्वेषणीयं भवद्भिः
रोषान्मां हिंसितुं वो न भवति सुकरं प्रागिवाऽतोपयात।
एतच्चैवं कुतश्चेत् यतिकुलपतिरामानुजार्योक्तिलीला -
लोलः श्रीतूप्पुलार्यो विलसति हृदयं गाढमाविश्य यन्मे॥ 7॥

अत्यल्पानित्यहीनायनगतिसुभरात्मोदराः भो ! नराः कौ
सुष्ठूपायं विमुक्तेः विषहनिरयतो नैव जानीथ यूयम्।
युष्माकं तं ब्रुवेऽहं निशमयत भवाम्भोधिदुःखापनुत्यै
तूप्पुल्जातस्य पादौ प्रणमत ! महतः पूरुषस्याऽऽशुभक्त्या॥ 8॥

सिद्ध्येयुः प्रश्रितत्वं मृदुशुभचरिताचारकारुण्यभावाः
नश्येयुर्नीचसङ्गोऽमतिरघनिचयोऽशुद्धिभावश्च तेषाम्।
श्रीमद्रामानुजस्य प्रगुणगुणनिधेस्तावकं सद्गुणानाम्
श्रीतूप्पुल् सूरिवर्यं ह्यनितरशरणा येऽति भक्त्या प्रपन्नाः॥ 9॥

आत्मैकालम्बिरक्ष्याश्रितदुरघमपोह्याऽनुकम्पाभिवर्षिन् !
तूप्पुल् स्वामिन् गुरो ! मे निजमहिमविदां कल्पभूजातकल्पः !।
संसारावर्तदुःखाधिकजलधिनिमग्नस्य पाशान् मदीयान्
विच्छिद्याऽद्धा प्रदेहि त्वदुभयपदनिर्वर्णनस्थास्नुसेवाम्॥ **10** ॥

कल्पक्षोणीरुहेति क्षितिगतधनिकान् संस्तुयां नैव वाचा
शैलेत्युग्रं तपस्यन् तनुमिह न दहेयं कथञ्चित् कदाऽपि।
विज्ञाताशेषतन्त्राऽप्रतिमकविमणे ! भक्तबृन्दस्तुतश्री
तूप्पुल् जाताऽद्भुत ! त्वं निरुपधिदयया मां च मुक्तं विधत्स्व॥ **11** ॥

कोऽप्यग्र्यो नास्त्युपायो मयि तदपि विमोहाधिकश्चाऽस्मि हन्त !
श्रुत्युक्ताचारहीनस्तदितरदुरनुष्ठाननिष्ठोऽभवं भोः।
विज्ञानोत्पत्तिभूमे ! श्रुतिशिखरगुरूत्तंस ! भाग्याधिकास्म -
त्तूप्पुल् देवेत ऊर्ध्वं नहि तव करुणायाः परो मे दयस्व॥ **12** ॥

कर्मज्ञानाढ्यभक्त्याचरण इह न मे शक्तिराहो विरक्तिः
विश्वासो वा प्रगाढो न च विधिविहितो न्यासकृत्येऽपि वास्ते।
तप्तस्वर्णाभमूर्ते प्रविलसदनघोदारकीर्ते सुतूप्पुल्
स्वामिन् ! त्वत्पादपाथोरुहयुगमधुना विस्मरेयं हि नैव॥ **13** ॥

भक्तिः साक्षात्त्वदग्रे मम पुनरचला न त्वदङ्घ्र्याश्रितेषु
प्रीतिर्वा नैव जातेत्यथ यदि मनुषे भोः फलं किं ततः स्यात्।
दोषस्पृग्दूरतूप्पुल् व्युदितविभुमणे पूर्णकारुण्यवर्षं
युष्मच्छीलानुरूपं गुरुवर मयि संवर्ष हर्षाज्जनिघ्नम्॥ **14** ॥

मान्यो नान्यः सहायो निरुपधिकरुणायास्तवास्ते ममातः
प्रौढे मेऽपास्य दुःखे हिततममपि विज्ञाय भूयस्त्वमेव।
श्रीमत्प्रेष्ठाष्टवर्णं मनुमनु पठितुं ताश्च निष्ठा वरिष्ठाः
स्वामिन्नद्य प्रदेयाः सदभिविनुततूप्पुल् कुलैकप्रदीप॥ **15** ॥

विख्याते वेङ्कटाद्रावनुकलविलसद्दिव्यदीपेऽखिलापे
    पद्मावासातिरम्यप्रसरसुरभितश्रीसमाश्लिष्टहृत्के।
युष्मद्भक्तेषु शुद्धाधिकमतिषु परां मे च सङ्कल्प्य भक्तिम्
    तादृक्षेषु त्वमेतामपनुद कपटां पाहि तूप्पुल् सुरक्षिन्॥ **16**॥

अस्मत्संरक्षकश्रीघटजलकुलपत्यार्यरामानुजस्य
    स्यन्दन्माध्वीकरक्ताम्बुजचरणयुगं प्रेत्य नित्यं प्रणम्य।
तद्धर्षेक्षाभिवर्षश्रुतिशिखरयुगोल्लासिसारार्थवर्षिन्
    भोः पूर्णत्राण तूप्पुल् कुलमहितपते! सन्ततं पालयाऽस्मान्॥ **17**॥

कारुण्यासारवर्षिन्! श्रुतिशिखरगुरो! पूत तूप्पुल् प्रभो! नः
    कव्यग्राहंयुतर्कप्रविदुरुमदहृत्केसरिन्! वादिमर्दिन्!।
मूर्ध्न्याधायाञ्जलिं मे निशमय वदतोऽमुं हि विज्ञापनां भोः
    युष्मद्भक्तैकसक्तं मम कुरु कृपया चित्तमश्रान्तमत्र॥ **18**॥

भक्तात्यन्तेप्सिते त्वत्पद इह जयतां स्मेरवक्त्रं च शुद्धं
    व्याख्यामुद्रः करस्ते जयतु विजयतां शुभ्रमुत्पुण्ड्रलक्ष्मीः।
दीव्यत्पद्माक्षमालात्रिगुणितमहिमब्रह्मसूत्रप्रकाशा
    मूर्तिर्जेजीयतां ते निरवधिसमयं तूप्पुलुत्पन्नरत्न!॥ **19**॥

शोभाभोगाङ्ग तूप्पुल्प्रभवगुरुवदान्यातिमृद्वङ्घ्रिपद्मे
    प्रोद्गातुं संश्रितानां सुखकर मनवं विंशतिं चान्तिमादिम्।
भक्त्यैतां ये प्रहृष्टाः सुदृढमनुदिनं सादरं कीर्तयन्ते
    तेषां पूतोत्तमाङ्गे विलसत इह तूप्पुल् गुरोः पादपद्मे॥ **20**॥

श्रीमद्वेदान्तसूरिप्रगुणसुमहिता द्राविडोक्तौ सुगाधाः
    चक्रे भक्त्या तदीयात्मजवरवरदस्सञ्ज्ञगौ सूरिवर्यः।
श्रीमद्वेदान्तरामानुजगुरुचरणासेवगोपालसूरिः
    श्लोकीकृत्याखिलास्ता व्यवृणुत सुखबोधाय भाषाद्वयेन॥

॥ इति पिळ्ळैयन्दादि समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥